प्रकाशक:

विद्यानिधिप्रकाशनम्

डी-10/1061 (समीप श्रीमहागौरी मन्दिर)

खजूरी खास, दिल्ली-110090

Email : vidyanidhiprakashan@hotmail.com



© सम्पादकाः



प्रथमसंस्करणम् : 2016

ISBN : 978-93-85539-13-8

मूल्य : ₹995.00

मुद्रक :

विशाल कौशिक प्रिंटर्स

दिल्ली


# वागुल्लासः

## द्वितीयो भागः

(द्वितीयनिखिलसंस्कृतच्छात्रसम्मेलनस्य शोधपत्रावलिः)

सम्पादकाः

यीशनारायणद्विवेदी, हरीशकुकरेती

अङ्कुशकुमारः, अनिलकुमार आर्यः


विशिष्टसंस्कृताध्ययनकेन्द्रम्

जवाहरलालनेहरूविश्वविद्यालयः

नवदेहली - ११००६७

विद्यानिधिप्रकाशनम्

नवदेहली


स्वयं सत्यापित

## 10

# आधुनिकसन्दर्भे वृक्षायुर्वेदविज्ञानं वन-वृक्षसंरक्षणञ्च


ललितपाण्डेयः


आधुनिकसर्वविधविज्ञानानामुद्भवस्थलं वैदिकवाङ्मयमेव वर्तते। वाङ्मयेऽस्मिन् भौतिक-रासायनिक-जैविक-वनस्पति-विमान-गणित-त्रिकोणमिति-ज्यामिति-कृषि-ज्योतिष्-शिल्प- वास्तुविद्या-भूगोल-गवाश्वहस्त्यादिपशुलक्षणानामर्थशास्त्र-भौगोलिकैतिहासिकादिविविधविचित्रविलक्षणवैज्ञानिकविषयाणां सन्निवेशो वर्तते। वस्तुतस्त्वस्माकमियं परम्पराऽमूल्यशेवधिकल्पा, अलौकिकपाण्डित्यप्रतिभापूर्णा विस्तृतज्ञानविज्ञानसम्भृता चास्ति यतोहीदं ज्ञात्वा महदाश्चर्यं भवति यत् प्राचीनभारते न केवलं मनुष्यादीनां चिकित्सा, अपितु पशुपक्षिवृक्षादीनामपि चिकित्सा भवति स्म। वृक्षारोपणं, बीजवपनविधिः, वृक्षरोगकारणानि, वृक्षचिकित्सा, तेषां वृद्धिसंरक्षणोपायाः, वृक्षपुष्पफलादीनां शुभाशुभज्ञानं, तेषां संवर्द्धनाय कीदृशी मृत्तिकाऽभीष्टा, कस्मिन् काले वृक्षारोपणमुत्तमं भवति, कीदृशा वृक्षा ओषधियुक्ताः, तेषां जीवनं कीदृक्षं भवति, तेषां रोगोपशमनं संरक्षणञ्च कथं सम्भाव्यते, पुरा वनस्पतीनां वैज्ञानिकं वर्गीकरणं कीदृक्षमासीदित्यादीनामर्थाद् वनवृक्षवनस्पत्यादिसमस्तपादपजातीनां सम्पूर्ण-जीवनवृत्तस्य विशिष्टज्ञानं वृक्षायुर्वेदविज्ञानमिति भवति। बृहत्संहिता, चरकसंहिता कृषिसङ्ग्रहः, पुराणादिप्राचीनशास्त्रग्रन्थेषु विविधा वृक्षवनस्पतयो विवेचिताः। यद्यपि वनस्पतिशब्दः फली वनस्पतिर्ज्ञेय[1] इति केवलं पुष्पोद्गमं विना फलवताम् उदुम्बरवटपिप्पलादीनामेव वाचकः परं वनस्पतिशास्त्रानुसारं सामान्येन समेषामुद्भिजां पादपानां वाचकोऽयं वनस्पतिशब्दः।

**वृक्षायुर्वेदविचारः**-वृक्षायुर्विज्ञानविषये बृहत्संहितायां विशिष्टविधिना बीजवपनं, बीजवपनस्य कालः, वृक्षरोगकारणानि, वृक्षचिकित्सा च विवेचिता। किमपि बीजं घृतहस्तेन सम्मर्द्य दशवासराणि दुग्धभावितं गोमयेन बहुशो विरुक्षितं शूकर-मृग-मांसैश्च